শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৪

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৭৪

*ভগৱতো মধুরাপুরীপ্ৰৱেশ রজকনিগ্ৰহ
ৱাযকমালাকারকুব্জানুগ্ৰহ ধনুৰ্ভঙ্গাদি ৱৰ্ণনম্ চ*

সম্প্ৰাপ্তো মথুরাং দিনাৰ্ধৱিগমে তত্ৰান্তরস্মিন্ ৱস-
    ন্নারামে ৱিহিতাশনঃ সখিজনৈৰ্যাতঃ পুরীমীক্ষিতুম্।
প্ৰাপো রাজপথং চিরশ্ৰুতিধৃতৱ্যালোককৌতূহল-
    স্ত্ৰীপুংসোদ্যদগণ্যপুণ্যনিগলৈরাকৃষ্যমাণো নু কিম্॥ ১ ॥

ত্বতপাদদ্যুতিৱত্ সরাগসুভগাস্তৱন্মূৰ্তিৱদ্যোষিতঃ
    সম্প্ৰাপ্তা ৱিলসতপযোধররুচো লোলা ভৱদদৃষ্টিৱত্।
হারিণ্যস্তৱদুরসস্থলীৱদযি তে মন্দস্মিতপ্ৰৌঢিৱ-
    ন্নৈৰ্মল্যোল্লসিতাঃ কচৌঘ রুচিৱদ্ৰাজতকলাপাশ্ৰিতাঃ॥ ২ ॥

তাসামাকলযন্নপাঙ্গৱলনৈৰ্মোদং প্ৰহৰ্ষাদভুত-
    ৱ্যালোলেষু জনেষু তত্ৰ রজকং কঞ্চিত্ পটীং প্ৰাৰ্থযন্।
কস্তে দাস্যতি রাজকীযৱসনং যাহীতি তেনোদিতঃ
    সদ্যস্তস্য করেণ শীৰ্ষমহৃথাঃ সোপ্যাপ পুণ্যাং গতিম্॥ ৩ ॥

ভূযো ৱাযকমেকমাযতমতিং তোষেণ ৱেষোচিতং
    দাশ্বাংসং স্বপদং নিনেথ সুকৃতং কো ৱেদ জীৱাত্মনাম্।
মালাভিঃ স্তবকৈঃ স্তৱৈরপি পুনৰ্মালাকৃতা মানিতো
    ভক্তিং তেন ৱৃতাং দিদেশিথ পরাং লক্ষ্মীং চ লক্ষ্মীপতে॥ ৪ ॥

কুব্জামব্জৱিলোচনাং পথি পুনদৃষ্টৱাঙ্গরাগে তযা
    দত্তে সাধু কিলাঙ্গরাগমদদাস্তস্যা মহান্তং হৃদি।
চিত্তস্থামৃজুতামথ প্ৰথযিতুং গাত্ৰেপি তস্যাঃ স্ফুটং
    গৃহ্ণন্ মঞ্জু করেণ তামুদনযস্তাৱজ্জগতসুন্দরীম্॥ ৫ ॥

www.prapatti.com

তাৱন্নিশ্চিতৱৈভৱাস্তৱ ৱিভো নাত্যন্তপাপা জনা
যতকিঞ্চিদ্দদতে স্ম শক্ত্যনুগুণং তাম্বূলমাল্যাদিকম্।
গৃহ্ণানঃ কুসুমাদি কিঞ্চন তদা মার্গে নিবদ্ধাঞ্জলি-
র্নাতিষ্ঠং বত হা যতোদ্য ৱিপুলামার্তিং ৱ্রজামি প্রভো॥ ৬ ॥

এষ্যামীতি ৱিমুক্তযাপি ভগৱন্নালেপদাত্র্যা তযা
দূরাত্ কাতরযা নিরীক্ষিতগতিস্তৱং প্রাৱিশো গোপুরম্।
আঘোষানুমিতত্বদাগমমহাহর্ষোল্ললদ্দেৱকী-
ৱক্ষোজপ্রগলতপযোরসমিষাত্ত্বতকীর্তিরন্তর্গতা॥ ৭ ॥

আৱিষ্টৌ নগরীং মহোতসৱৱতীং কোদণ্ডশালাং ৱ্রজন
মাধুর্যেণ নু তেজসা নু পুরুষৈর্দূরেণ দত্তান্তরঃ।
স্রগভির্ভূষিতমর্চিতং ৱরধনুর্মা মেতি ৱাদাত্ পুরঃ
প্রাগৃহ্ণাঃ সমরোপযঃ কিল সমাক্রাক্ষীরভাঙক্ষীরপি॥ ৮ ॥

শ্বঃ কংসক্ষপণোতসৱস্য পুরতঃ প্রারম্ভতূর্যোপম-
শ্চাপধ্বংসমহাধ্বনিস্তৱ ৱিভো দেৱানরোমাঞ্চযত্।
কংসস্যাপি চ ৱেপথুস্তদুদিতঃ কোদণ্ডখণ্ডদ্বযী-
চণ্ডাভ্যাহতরক্ষিপূরুষরৱৈরুতকূলিতোভূত্ ত্বযা॥ ৯ ॥

শিষ্টৈর্দুষ্টজনৈশ্চ দৃষ্টমহিমা প্রীত্যা চ ভীত্যা ততঃ
সম্পশ্যন্ পুরসম্পদং প্রৱিচরন্ সাযং গতো ৱাটিকাম্।
শ্রীদাম্না সহ রাধিকাৱিরহজং খেদং ৱদন্ প্রস্বপ-
ন্নানন্দন্নৱতারকার্যঘটনাদ্বাতেশ সংরক্ষ মাম্॥ ১০ ॥

**********